**बलप्रसू** स्त्री ६त० । रोहिण्यां वसुदेवभार्य्याभेदे स्त्री शब्दच० तज्जनन्यादयोऽप्यत्र ।

**बलभद्र** पु०बल+अर्श आद्यच बलो बलवानपि भद्रः सौम्यः । १बलदेवे, अमरः । २गवये राजनि० । ३अनन्ते पु० ४बलयुते त्रि० हेमच० । ५लोध्रे शब्दच० । बलेषु भद्रा । ६त्रायमाणौषधौ ६घृतकुमार्य्यां च स्त्री मेदि० । स्वार्थे क । बलभद्रिका तत्रार्थे स्त्री अमरः ।

**बलराम** पु० बलेन रमते रम-संज्ञायां कर्त्तरि घञ् बलोपपदको वा रामःशा०त० । कृष्णाग्रजे रोहिणीनन्दने संकर्षणे रामस्य दाशरथिपरशुरामबलरामभेदेन त्रित्वात् अस्य बलोपदकत्वात्तथात्वम् । [भरतः ।

**बलल** पु० बलं लाति ला-क बल-कलच् वा । बलरामे

**बलवत्** अव्य० बल+अतिशये मतुप् मस्य वः । १अतिशये अमरः । "बलवदपि शिक्षितानाम्" शकुन्तला । २बलविशिष्टे मांसले त्रि० अमरः स्त्रियां ङीप् । [जटाधरः ।

**बलवर्द्धिनी** स्त्री० बलं वर्द्धयति वृध-णिनि । जीवकौषधौ

**बलविन्यास** पु० बलानां सैन्यानां विशेषेण दुर्भेद्यतायै न्यासः स्थापनम् । व्यूहे सेनासन्निवेशविशेषे अमरः ।

**बलशालिन्** त्रि० बलेन शालते शाल-णिनि । बलविशिष्टे स्त्रियां ङीप् । [इन्द्रे हला० । बलनिसूदनोऽप्यत्र ।

**बलसूदन** पु० बलं तन्नामकमसुरं सूदयति सूद-ल्यु ।

**बलस्थिति** स्त्री स्था-आधारे क्तिन् ६त० । शिविरे त्रिका० ।

**बलहन्** पु०बलनामासुरं बलं वा हन्ति हन-क्विप् । बलारातौ १इन्द्रे २श्लेष्मधातौ शब्दर० । ३बलरामे हरिवं० १११ अ० ।

**बला** स्त्री० बलं कार्य्यत्वेनास्त्यस्याः । (बालियड़ा) १क्षुपभेदे, अमरः । "बलाचतुष्टयं शीतं मधुरं बलकान्तिकृत् । स्निग्धं ग्राहि समीरास्रपित्तास्रक्षतनाशनम् । बलामूलत्वचश्चूर्णं पीतं सक्षीरशर्करम् । मूत्रातिसारं हरति दृष्टमेतन्न संशयः" भावप्र० । विश्वामित्रेण रामाय दत्ते २अस्त्रविद्याभेदे अतिबलशब्दे दृश्यम् ।

**बलाका** स्त्री० बल-संवरणे आक । १बकपङ्क्तौ २बके बिषकण्ठिकायां ३बकभेदे ४कामुक्यां च शाश्वतः ।

**बलाकाश्व** पु० अजकन्दपपुत्रे नृपभेदे हरिवं० ७अ० ।

**बलाकिन्** त्रि० बलाका+ब्रीह्या०इनि । १बलाकायुक्ते स्त्रियां ङीप् २धृतराष्ट्रपुत्रभेदे पु० भा० आ० ६७अ० ।

**बलाङ्गक** पु० बलयुक्तमङ्गमत्र कप् । वसन्तकाले हेमच० ।

**बलाञ्चिता** स्त्री ३त० । बलरामवीणायां शब्दरत्ना० ।

**बलाट** पु०बलाय तद्दानाय अटति गच्छति उदरम् अट-अच् । मुद्गे (मुग) हेमच० ।

**बलात्** अव्य० बलं सामर्थ्यं कारणत्वेनातति अत-क्विप् । हठादित्यर्थे । पञ्चम्यन्तबलशब्देनास्य न गतार्थता बलात्कार इत्यादिसिद्धये तस्यावश्यमङ्गीकार्य्यत्वात् । [च ।

**बलात्कार** पु०बलात्+कृ-घञ् । बलपूर्वककरणे, हठात्करणे

**बलात्मिका** स्त्री० बलमेवात्मा स्वरूपं कारणत्वात् यस्याः कप् अत इत्त्वम् । (हातिशुड़ा) हस्तिशुण्डीवृक्षे शब्दर०

**बलादि** पु० चतुरर्थ्यां यः प्रत्ययनिमित्ते १शब्दगणे स च गणः पा०ग०उक्तो यथा "बल चुल नल दल वट लकुल उरल पुल मूल उल डुल वन कूल" । अस्त्यर्थे वा १मतुप्रत्यय निमित्ते २शब्दगणे च स च गणः पा०ग०सूत्रे उक्तो यथा "बल उत्साह उद्भास उद्वास उद्दास शिखा कुल चूड़ा सुल कूल आयाम व्यायाम उपयाम आरोह अवरोह परिणाह युद्ध" ।

**बलाद्या** स्त्री० बलाय आद्या । (वेलियाड़ा) क्षुपभेदे राजनि

**बलाध्यक्ष** पु० ६त० । सेनापतौ मनु० ७।१८९ ।

**बलानुज** पु० अनुजायते अनु+जन-ड ६त० । श्रीकृष्णे ।

**बलाबलाधिकरण** न० बलञ्च अबलञ्च ते अधिक्रियेते अस्मिन् अधि+कृ-आधारे ल्युट् । आकाङ्क्षानाकाङ्क्षारूपबलाबलयोर्निश्चायके जैमिन्युक्ते न्यायभेदे यथा "सा वैश्वदेव्यामिक्षा भवति वाजिभ्यो वाजिनम्" इत्यत्र वैश्वदेवयागस्यामिक्षान्वितत्वेनन वाजिनाकाङ्क्षेति न तत्र तस्यान्वयः वेदान्तप० ।

**बलामोटा** स्त्री० बलमामोटयति आ+मुट-अच् । नागदमन्याम् भवाप्र०

**बलाय** पु० बलस्यायः स्थानम् । वरुणवृक्षे शब्दच० ।

**बलाराति** पु० बलस्य तन्नामासुरस्यारातिः । इन्द्रे अमरः । बलशत्रुप्रभृतयोऽप्यत्र । [ख्लु । पानीयामलके शब्दच० ।

**बलालक** पु० बलाय सामर्थ्याय अलति पर्य्याप्नोति अल-

**बलास** पु० बलमस्यति क्षिपति अस०अण् उप०स० । कफधातौ हेमच० "गौरवं कफसंस्रावोऽरुचिस्तम्भोऽग्निमार्दवम् । माधुर्य्यमपि चास्यस्य बलासावतते हृदि" सुश्रु

**बलाह्वकन्द** पु० बलं सामर्थ्यमाह्वयति आ+ह्वे-क तादृशः कन्दः । गुलञ्चकन्दे राजनि० ।

**बलि** पु० बल-इन् । १ पूजायाम् २उपहारे, "ददतुःस्तौ बलिं चैव निजगात्रासृगुक्षितमिति" चण्डी ३राजग्राह्ये अमरः ४चामरदण्डे, ५गृहस्थकर्त्तव्यपञ्चयज्ञमध्ये भागे, ५भूतयज्ञे, हेमच० । "बलिकर्म ततः कुर्य्यादिति" स्मृतिः ।